*श्रीमल्ललितालालितस्येयं टीका-*

*जयति श्रीरामानन्दनाथगुरुपादुका महामहती॥*

*जयति च श्रीकामेशाङ्कवासिनी महामहिषी ॥*

**प्रणम्य गुरुचिद्घनं नततमस्ततिध्वंसनं**

**सुखाम्बुरसमिष्टिदं सुकृतिनां हृदब्जे सदा।**

**करोमि चितिवृद्धये जनिविमुक्तये ज्ञानिनां**

**त्रयीहृदयसागरोद्भवविरक्तिरत्नावलिम्॥ १॥**

*चिद्घनं चैतन्यमात्रात्मकं शुद्धं । नतानां तमस्ततिरज्ञानपरम्परा तस्या ध्वंसनं यस्मात् तम्। भवति ह्यनेकविषयोपाधिनानेकत्वमज्ञानस्य वस्तुत एकत्वेऽपि। गुरुमेवाह - सुखाम्बुरसमिति। सुखमेवाम्बु जलं तत्रापि यद्रसं सारं निर्विशेषं ब्रह्मात्मकं विषयाजन्यं तदेव सः। अज्ञाननाशादपि गुरुप्रणतिफलमाहेष्टिदमिति। इष्टिरभिलाषो यागो वा। आद्ये अभिलाषविषयदमन्त्ये श्रुतिप्रतिपादितयागोपदेशद्वारा धर्मदमित्यर्थः। धर्मस्य च मोक्षौपयिकज्ञानहेतुत्वमकथनसिद्धं यस्मात्कृतस्य अदृष्टजनकस्य वेदाद्युपदिष्टस्य धर्माख्यस्य कर्मणश्शुभाशुभफलजनकत्वमापामरं सिद्धम्। गोपाः स्त्रियश्च दुःखावसरे कृतमेव भुनक्ति जन इति वदन्ति आर्यावर्ते। आर्यावर्तीयजनानां च प्रामाण्यं श्रुतिसिद्धप्रामाण्यवतो मनोर्वाक्यात्-*

*एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।*

*स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः॥ इति।*

इष्टदमिति पाठे तु सरलमर्थः। तं गुरुं प्रणम्य। सुकृतिनामुक्तधर्मजन्यादृष्टवतां योगिनां हृदब्जे हृदयकमले सदा चितिवृद्धये कर्तृत्वबुद्धिनाशकज्ञानवृद्धये ज्ञानिनां च शब्दशास्त्रमात्रं जानतां ब्रह्मविद्याजननद्वारा जनिविमुक्तये जरामरणमोक्षाय विरक्तिरत्नावलिं करोमि तन्नामग्रन्थं निबध्नामि। त्रय्या वेदानां हृदयं वेदान्तमुपनिषदस्तच्च गभीरत्वात्सागरोपमं ततश्च वैराग्यरत्नावल्या उदयो मथनाद्यथा क्षीराब्धेः। विरक्तिरत्नावलिस्त्रयीमूलत्वमनेनोक्तं सत्पौरुषेयत्वनिमित्तकमप्रामाण्यसन्देहमपाकरोति॥ १॥